ISSN: 2347-4491
UGC Journal No. 49095
IIJF Impact Factor: 2.382

Vol. 6 No. 4 October - December, 2018

# अयन Ayan

An International Multi-Disciplinary Quarterly Refereed Research Journal

Editor-in-Chief
Dr. Bindu Bhushan Upadhyay

Executive Editor
Dr. Vikramaditya Rai

Managing Editor
Dr. Neeraj Kumar Rai

Editors
Dr. Vikash Kumar
Dr. Kumar Varun

❖ जनसंचार माध्यमों का शहरी एवं ग्रामीण बाल अपराधियों पर पड़ने वाले प्रभाव का विश्लेषणात्मक अध्ययन — 85-90
*प्रकाश कुमार प्रसाद*

❖ **A Study of Interest Rate Derivatives and Currency Derivatives in HDFC Bank and BOB** — 91-98
*Tripurari Kumar*

❖ **Population Effect on Resources Utilization in Patna Division** — 99-106
*Dr. Narendra Pratap Palit*
*Amit Kumar Rajan*

❖ **Relevance of Yoga in Present Education System of Global Organization** — 107-115
*Shishu Pal Singh*

❖ **Role of Micro Finance in Women Empowerment** — 116-121
*Aradhana Jaiswal*

❖ सोशल मीडिया : प्रयोग एवं चुनौतियाँ — 122-123
*अनुप्रिया श्रीवास्तव*

❖ मध्यकालीन भारत में जाति व्यवस्था — 124-130
*पंकज कुमार चौधरी*

❖ लोककला एवं सौन्दर्य — 131-134
*सप्तमी पाल*

❖ मंजूर एहतेशाम के उपन्याससूखा बरगद : मुसलमानों की सामाजिक संरचना — 135-140
*स्वाती सिंह*

❖ प्राचीन भारत में चिकित्सा विज्ञान — 141-144
*ओमकार नाथ पाण्डेय*

❖ संगीतकलायां विलसति कविकुलगुरुः कालिदासः — 145-148
*डॉ. किरण आर्या*

❖ देवगढ़ क्षेत्र में जैन धर्म के प्रतीक चिन्हों का अंकन (300 B.C. to 300 A.D.) — 149-155
*देवेन्द्र कुमार*

❖ **The Male world in Anita Desai's Cry, the Peacock: A Psychoanalytical Reading** — 156-161
*Dr. Anita Konwar*

❖ रवीन्द्र जैन कागीत संगीत और समाज — 162-165
*अनुभव पाण्डेय*

❖ आधुनिक संस्कृत कथा साहित्य की नवीन विधा 'टुप कथा' — 166-167
*मंगल देव त्रिपाठी*

# संगीतकलायां विलसति कविकुलगुरुः कालिदासः

*डॉ. किरण आर्या*

*सहायक–प्राध्यापिका, संस्कृत–विभाग, डॉ. हरिसिंह गौर विश्वविद्यालय, सागर*

न तच्छास्त्रं न तच्छिल्पं न सा विद्या न सा कला।
भारते नैव किञ्चित् यत् कालिदासे न विद्यते।।

सृष्टेः आदिकालादेव गीतं नृत्यं तथा वाद्यं त्रयमिति मानवानां मनोरागामिव्यक्तीकरणाय सरलः नैसर्गिकः माध्यमः बोभवीति आरभत एव मानवसृष्टिः शौर्योत्साहं, हर्षोल्लासं, शोकोत्तापं च मूर्त्तरूपप्रदानाय एतेषां साहाय्यं जरीगृह्यते। अपितु अखिलमपि ब्रह्माण्डं संगीतमयं कदाचिद्दृष्यते सर्वैः साहित्यसंगीतकलायुतैः कविविषष्टैः – पवनस्य प्रवाहः, प्रपातस्य अवतरणम्, सरितः अभिसरणम्, पक्षिणां गुञ्जनम्, पषूनामुन्नदनम्, षिषूनां रोदनम् इत्यत्र सर्वत्र नादस्य तीव्रमध्यमन्द्ररूपस्वराणामारोहः अवरोहः लये गतिः यतिः स्पष्टमेव संश्रूयते व्याख्यायते च। संगीतदर्पणस्य रचनाकारः दामोदरपण्डितमहाषयानुसारं तु मयूरात् षड्जस्वरः, चातकात् ऋषभस्वरः, अजायाः गान्धारस्वरः क्रौञ्चान्मध्यमस्वरः, कोकिलात् पञ्चमस्वरः, दर्दुरात् धैवतस्वरः गजाच्च निषदस्वरस्य उद्भूतिर्भवति।

भारते नाट्यग्रन्थस्य प्रणयनं कविकर्म मन्यते। कविभवनाय च कविषास्त्रीयसिद्धान्तैः परम्पराभिः सह अन्यषास्त्राणां विधानामपिज्ञानमावष्यकं भवति यः कविः यावत् बहुज्ञो भवति सस्तावत् सर्वत्र समादृतः भवति, अत एव काव्यप्रकाषकारः मम्मटः ब्रवीति–

**शक्तिर्निपुणता लोकषास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञषिक्षयाभ्यास इति हेतुस्तदुद्भवे।।***1

तस्मादेव संस्कृतकवयः सामान्यतया वैदिकसाहित्यस्य, कर्मकाण्डस्य, व्याकरणषास्त्रस्य ज्योतिषविद्यायाः, छन्दोविद्यायाः, अष्वगजादिपषुविद्यायाः वायसादिखगविद्यायाः, पुराणेतिहासविद्यायाः, वार्त्ताविद्यायाः कामषास्त्रादीनां च न केवलं विषेषज्ञाः भवन्ति स्म, भवन्ति च। अपितु ते कवयः स्वकाव्येषु स्वीयासु रचनासु एताभिः विद्याभिः प्राप्तज्ञानं प्राप्तानुभवं यथास्थानमित्थं निवेषयन्ति यत्तन्नैव ज्ञानस्य अपितु कलायाः अंगमिव प्रतिभासते। कवेः श्रेष्ठत्वमनेन प्रमाणितं भवति यत्सः विविधविद्यानां प्रस्तुतीकरणं कलात्मकरूपेण विदधाति। काव्येषु यावत् शब्दार्थयोः साहिती अपेक्ष्यते तत्र ज्ञानकलायाः विविधषास्त्राणां च साहिती अपि तावदेव अपेक्ष्यते। तत्र खलु विविधकलानिष्णातेन सकलषास्त्रज्ञेन कालिदासेनापि स्वीयासु सप्तरचनासु सर्वेषां शास्त्राणां, सर्वासां च कलानां तथा समाहारः कृतः यत्ताः कृतयः काव्यस्वरूपधारिण्यः महाकाव्यस्वरूपधारिण्यः विष्वविश्रुताः अद्यावधि सन्ति यावच्चन्द्रदिवाकरौ च भवितारः। कालिदासोऽपि महाकवि इत्युपाधिना अलंकृतः सन् 'अद्वितीयः अप्रतिमः कालिदासः' इत्युद्घोषयमाणे काव्यजगति अधुनाकालं यावत् तथैव विराजते यथोक्तम् –

**पुरा कवीनां गणनाप्रसंगे कनिष्ठिाधिष्ठितकालिदासः।**
**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव।।**

**'गीतं वाद्यं तथा नृत्यं त्रयं संगीतमुच्यते'***2

एतदनुसारं गायनवादननृत्य–त्रयं संगीतस्यान्ते परिगणिताः भवन्ति , संगीतस्यैताः स्वतन्त्राः विधाः, किन्तु प्रयोगावसरे एताः परस्परमपेक्षन्ते। महाकविकालिदाससाहित्ये गायन–वादन–नृत्य–त्रयाणामेवैतेषां प्रभूतः उल्लेखः प्राप्नोति एतेन स्पष्टं भवति यत् अन्यषास्त्राणामिव महाकविकालिदासः संगीतविद्यया अपि सम्यक् सुपरिचित आसीत्। संगीतकलायाः यावदुल्लेखः कालिदासस्य कृतिषु दृष्यते न तावत् अन्यकविकाव्येषु तथा अवलोक्यते। अनेन संगीतबद्धोल्लेखेन कालिदासस्य साहित्यमपूर्वां रमणीयतां मधुरतां च प्राप्नोति। त्रिविधसंगीतस्य मनोहारिवर्णनं रघुवंषस्य निम्नलिखितपद्ये द्रष्टव्यं खलु –

**तस्यायमन्तर्हितसौधभाजः, प्रसक्तसंगीतमृदंगघोषः।**
**वियद्गतः पुष्पकचन्द्रषालाः क्षणं प्रतिश्रुन्मुखराः करोति।।***3

भगवतः श्रीरामस्य सीतया सह आकाषमार्गात् लंकातः अयोध्यां प्रति गच्छति काले सीतां प्रति पथि आयतः स्थलाननेकान् वर्णयति , तथैव क्रमे मार्गे शातकर्णीमुनेराश्रमसकाषात् पुष्पकविमानमारोहयन्तं मृदंगध्वनिमाकर्ण्य रामः ब्रूते सीताम् – हे सीते! आकाषमार्गात् समागच्छन् य एषः संगीतमिश्रितमृदंगध्वनिः पुष्पकविमानस्य चन्द्रषालां षिरोभागं प्रतिध्वनयति स ध्वनिः जलेऽन्तर्निहितशातकर्णीमुनेराश्रमादायाति। इह महाकविकालिदासः 'प्रसक्तसंगीतमृदंगघोषः' पंक्त्या संगीतेन सह मृदंगवादनमपि निर्दिषति। पंक्तिमिमां व्याख्यन् रघुवंषस्य टीकाकारः सुमतिविजयः, चारित्रवर्द्धनष्च लिखति – **प्रसक्तं समारब्धं संगीतं यत्र तथाभूतोऽयं मृदंगानां घोषः शब्दः***4। पदस्यास्य व्याख्यातुः हेमाद्रेः कथनम् – **प्रसक्ते संगीते नृत्यगीतवाद्यात्मके मृदंगानां घोषः***5। आचार्यमल्लिनाथेन **'प्रसक्तः'** इति पदस्य **संततः***6 इत्यर्थः गृहीतः। तदनु तत्र भवने सततं संगीतध्वनिः भवति स्म। यस्मात् मृदंगध्वनिः पुष्पकविमानमाष्लिषति। शब्दानां सूक्ष्मज्ञाता, शब्दानां साभिप्रायप्रयोकर्ता महाकविकालिदासद्वारा प्रयुक्तस्य पद्यस्यास्य संगतपदेनेदं ध्वनितं भवति यत्तत्र गीतं वाद्यं नृत्यं त्रयमपि सततं वरावृतीति।

संगीतस्य तिसृषु विधासु गीतस्य प्राधान्यं सर्वसम्मतं विद्यते यतोहि भावाभिव्यक्तेः प्रमुखं सरलं सहजं माधुर्ययुतं कर्णप्रियं च साधनं गीतमेव। अत एव प्रसन्नावसरे सर्वे जनाः गीतं गायन्ति। मेघदूते कालिदासपद्ये अयोध्यायाः विलासिन्यः रमण्यः जलक्रीडासमये मधुरं गानं कुर्वन्ति सहैव च स्वकरैः जलस्य आस्फालनं कुर्वन्ति तया जलास्फालनक्रियया या मृदंगसदृषः ध्वनिः श्रूयते ध्वनिमिमं मेघध्वनिरिति मन्यमानैः मयूरैः केकाशब्दं कुर्वद्भिः नृत्यं प्रति सन्नद्धैः भूयते। तथा च श्लोकः –

**तीरस्थलीबर्हिभिरुत्कलापैः, प्रस्निग्धकेकैरभिनन्द्यमानम्।**
**श्रोत्रेषु सम्मूर्च्छति रक्तमासां गीतीनुगं वारिमृदंगवाद्यम्।।***7

कालिदासस्य अमुष्मिन् पद्ये अनेके पदाः सांगीतिकं व्याख्यानमपेक्षन्ते तत्र वारिमृदंगपदं व्याख्यन् टीकाकारैरभिहितम् – **वार्येव मृदंगः तद्वाद्यं वारिमृदंगवाद्यम्,***8 अर्थात् जलरूपिमृदंगः। अनेन पदेन कवेरयं भावः अभिव्यज्यते यत् ताः विलासिन्यः रमण्यः मृदंगवादनकलायां, उदकवानकलायां निपुणा आसन् तत एव ताः जलास्फालनक्रियाद्वारा मनोहरं ध्वनिमाविर्भावयन्ति स्म, तस्य परिणामः मयूराः अपि नर्तनक्रियायै समुद्यताः भवन्ति स्म। अत्र **'उत्कलापैः'** इति पदस्य व्याख्यां कुर्वन् चारित्रवर्द्धनः लिखति –

**धाराधरनादानुकारिप्रमदाकरताडितजलारावश्रवणसमनन्तरं हर्षवषादुद्गतः कलापो यैः***9।

अर्थात् प्रमदाभिः रमणीभिः उत्पन्नं मनोहरं जलरवं संश्रुत्य हर्षोल्लासकारणात् येषां मयूराणां पक्ष्माणि उपरिभूतानि सन्ति। अनेन उद्भासितं भवति यत् जलक्रीडारतैः प्रमदाभिः करकंकणमिश्रितं वारिमृदंगनादं, मेघगर्जननाद इव मन्यमानाः, तद्वत् प्रतीतिं कुर्वाणाः उद्गतकलापाः मयूराः नृत्यक्रियायां मग्नाः भवन्ति अर्थात् कान्ताभिस्तथा मनोज्ञे नीरमध्ये कंकणषब्दः क्रियते येन तटस्थाः केकिनो घनगर्जितमत्या हृष्येयुः। अस्मिन् पद्ये सांगीतिकं सूक्ष्मं तत्त्वं सन्निवेष्य कालिदासः इह काव्यात्मकचारुतामादधाति। श्लोकेऽस्मिन् वारिवाद्य–उदकवाद्यनामकं वाद्यं वर्णयित्वा ललितकलायाः वर्णनं कविकालिदासः करोति। कामसूत्रे एतदुल्लिखितमस्ति यत् – **जलस्य करैः आस्फालनेन या मृदंगसमः ध्वनिः उद्भूतो भवति सः उदकवाद्यनामककला वर्तते***10। कालिदासानुसारेण अयोध्यायाः रमण्यः कलायामस्यां दक्षा आसन्।

मेघदूतेऽपि अलकापुर्यः प्रसादानां वर्णनप्रसंगे त्रिविधसंगीतस्यार्थे संगीतपदस्य प्रयोगः निम्नलिखितपद्ये द्रष्टव्यः –

**विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः,**
**संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम्।**
**अन्तस्तोयं मणिमयभुवस्तुंगमभ्रंलिहाग्राः,**
**प्रसादास्त्वां तुलयितुमलं यत्र तैस्तैर्विषेषैः।।***11

अस्मिन् पद्ये यक्षः मेघं प्रति अलकापुर्यः वर्णनं कराति यत् यत्र अलकापुर्यां रम्यस्त्रियः चित्रसमन्विताः तौर्यत्रिकाय संगीताय ताडितमृदंगः रत्नमयभूमयः, गगनचुम्बिषिखराः देवगृहाणि, तडिद्वन्तम् इन्द्रधनुर्युक्तं मधुरगम्भीरगर्जनम् अन्तर्जलं त्वामुन्नतं मेघं तुलयितुं समर्थाः सन्ति। इह कविः संगीताय प्रहतमुरजाः **स्निग्धगम्भीरघोषम्** एतत्कथनद्वारा संगीताय विहितस्य मुरजवाद्यस्य तुलना मेघस्य मनोहरगम्भीरध्वनिना करोति। संगीताय पदेन ध्वनितं भवति यत् गीतं वाद्यं नृत्यं त्रयेऽपि सत्यत्र मुरजवाद्यस्य कविद्वारा पृथगुल्लेखः तस्य मुरजवाद्यस्य महत्त्वमेव प्रदर्षयति।

पूर्वमेघेऽपि कविना अस्य मुरजषब्दस्य प्रयोगः कृतः –

**शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः,**
**संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।**
**निह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्यात्**
**संगीतार्थो ननु पषुपतेस्तत्र भावी समग्रः।।***12

पद्येऽस्मिन् कविः मेघध्वनिं मुरजध्वनितुल्यं कथयन् निह्राद इति विषेषणं च प्रयुज्य एतत् स्पष्टीकृतवान् यत् मेघस्य गर्जनध्वनिः गम्भीरध्वनिः, मुरजसदृषः ध्वनिः भवति। निह्रादषब्दस्य अर्थः गम्भीरषब्दः विद्यते – **निह्रादः शब्दगाम्भीर्यम्***13। कालिदाससमये मुरजवाद्यस्य प्रचलनमतिषयेनासीदिति मुरजषब्दस्य अनेकत्रोल्लेखेन ज्ञायते। तथा अन्यैः वाद्यैः सह इदमपि वाद्यं सहभागितां गृह्णाति स्म। कतिपयैः टीकाकारैः मुरजषब्दस्य मृदंग इत्यर्थं कुर्वन्ति यथा नन्दार्गीकरसम्पादितमेघदूतटीकायाम् –

**ते तव ध्वनिः चेत् यदि मुरज इव मृदंगध्वनिरिव कन्दरेषु दरीषु निह्रादी प्रतिध्वनिमत्त्वात् गम्भीरषब्दवान् स्यात्।***14

मेघस्य गम्भीरगर्जनेन मुरजवादनसाम्यस्योल्लेखः कालिदासः स्वमहाकाव्ये कुमारसम्भवेऽपि अकार्षीत् यदा सः ओषधिप्रस्थनगरस्य गृहाणां वर्णनं षष्ठे सर्गे करोति –

**षिखरासक्तमेघानां व्यज्यन्ते यत्र वेष्मनाम्।**
**अनुगर्जितसंदिग्धाः करणैर्मुरजस्वनाः।।***15

अर्थात् ओषधिप्रस्थनगरस्य गृहाणां षिखरेषु आच्छन्नमेघानां गर्जनमिश्रितगृहेभ्यः मुरजध्वनिं श्रवणे सति जनाः मेघगर्जनं मत्वा भ्रमायन्ते स्म।गृहाणां षिखरेषु विराजमानानां मेघानां गर्जने तथा मुरजध्वनौ एतावधिकं साम्यमासीत् यत् जनास्तत्र काठिन्यमनुभवन्ति स्म यदयं मुरजध्वनिः? मेघस्य गर्जनध्वनिर्वा? विद्यत इति। अस्य भ्रमस्य निवारणंताललयद्वारा भवति स्म। ताललयकृते कालिदासः अत्र करणषब्दस्य प्रयोगं चकार – यं व्याख्यन् आचार्यमल्लिनाथः लिलेख – **करणैः तालव्यवस्थापकैस्ताडनविषेषैः,**। **तदुक्तं राजषेखरेण –**

**नृत्यवादित्रगीतानां प्रयोगवषमेदिनाम्।**
**संस्थानं ताडनं रोधः करणानि प्रचक्षते।।***16

अर्थात् करण इति शब्दः तालव्यवस्थापकः ताडनविषेषकः वर्तते। यस्मात् मुरजवाद्यात् नानाविधाः ध्वनयः निःसृताः भवन्ति। एवं च उपर्युक्तपद्ये कविद्वारा करणषब्दस्य समुचितप्रयोगः तस्य कवेः वादनस्य सूक्ष्मषास्त्रीयतत्त्वस्य ज्ञानमपि स्फोटयति।

एवं चेह मया स्थालीपुलाकन्यायमनुसृत्य महाकाव्येभ्यः त्रिभ्यः पद्यद्वयं पद्यद्वयमुद्धृत्य कालिदासस्य संगीतज्ञानविषयकं चिन्तनं दिग्दर्षितम्। संगीतस्य तासां तिसृणां स्वतन्त्रविधानामनेकविधः उल्लेखः कालिदासस्य सर्वासु कृतिषु द्रष्टुं शक्यते। कालिदासस्य साहित्यं पाठकाय यावत्सुकरं तावद्दुष्करमपि विद्यते किन्तु भाषादृष्ट्या कालिदासः संस्कृतकविषु सर्वाधिकः सरलः अस्ति अतः अन्वयपूर्वकं वाक्यार्थमवगमने तेषां रचनासु काठिन्यं न भवति। अतः संगीतदृष्ट्या यदि कालिदाससाहित्यस्य अध्ययनं क्रियते चेत् ज्ञायते यत् संगीतकलायाः प्रभूतोल्लेखः अस्य महाकवेः कृतिषु विद्यते, एते सांगीतिकाः प्रयोगाः न केवलं कालिदासेन कृता एव अपितु तेषामौचित्यपूर्णत्वम् सरसत्वमपि तत्र तत्र अवलोकयितुं शक्यते। एतेन संगीतविषयकं परमं वैदुष्यं महाकविकालिदासस्य सूचितमिह बोभूयते अन्ते इदमेव वक्तुं प्रभवामि –

जायन्ते कति जज्ञिरे जनिष्यन्ते कतीह क्षितौ,
स्रष्टारो नितरामिदं तु कविभिनिर्मत्सरैः कथ्यताम्।
आपूर्वापरदक्षिणोत्तरहरित्साहित्यसिंहासन–
स्वैरारोहपराक्रमं भजतु कः श्रीकालिदासात्परः।।

सन्दर्भाः


1 काव्यप्रकाषः (1.3)
2 संगीतरत्नाकरः (1.21)
3 रघुवंषम् (13.40)
4 रघुवंषम्–नन्दार्गीकरसम्पादितम् (13.40)पृ.881
5 रघुवंषम्–नन्दार्गीकरसम्पादितम् (13.40)पृ.881
6 रघुवंषम्–नन्दार्गीकरसम्पादितम् (13.40)पृ.412
7 रघुवंषम् (16.64)
8 रघुवंषम्–नन्दार्गीकरसम्पादितम् (16.64)
9 रघुवंषम्–नन्दार्गीकरसम्पादितम् (16.64 पृ. 939)
10 कामसूत्रम् (1.3.15)
11 मेघदूतम्, उत्तरमेघः (2.1)
12 मेघदूतम्, पूर्वमेघः(1.60)
13 मेघदूतम्–नन्दार्गीकरसम्पादितम् पृ. 73।
14 मेघदूतम्–नन्दार्गीकरसम्पादितम् पृ. 73।
15 कुमारसम्भवम् (6.40)
16 कुमारसम्भवम्, मल्लिनाथटीका, पृ. 104।